मि ६२५

268

शि. प्र. मंडळी, पुणे ९.

य

ग्रंथ न … ह्मण –

…ाद्:

लेखक कविकुलतिलक, पद्मनाभ केशव भट्टाचार्य

प्रत्याख्यान …

पत्र:

36

[illegible]

।१पत्रं६॥

मि ६२५
२८४

SHIKSHANA PRASARAKA MANDALI
MIMAMSA
VIDYALAYA,
1924.
POONA.

सा॰प्र॰ श्रीगणेशायनमः॥ ननुसामान्यलक्षणप्रत्यासत्तिर्नोमनास्त्येव॥ तथाहि॥ साकिंसर्वोपसंहारेणव्याप्तिग्रहा
१ र्थंस्वीकार्या॥ उतशक्तिग्रहार्थं॥ यद्वावह्निमानयमित्यनुमितौविशेषणज्ञानार्थं अथवाव्यभिचारशंको
पपादनार्थंस्विलाकादौचिकीर्षोपपादनार्थं॥ सुखादाविच्छार्थंवा॥ अंधकारस्याभावत्वेनतत्प्रतियोगि
भूतप्रौढप्रकाशकयावत्तेजोज्ञानार्थंवा॥ नाद्यः॥ व्याप्तिग्रहस्यसामान्यलक्षणप्रत्यासत्तिंविनाप्युपप
त्तेः॥ तथाहि॥ अयंहिपरस्याभिप्रायः॥ धूमत्वावच्छिन्नाव्याप्तिःसकलधूमवृत्तिः॥ साचयदाहमहानसी
यधूमेप्रत्यक्षेणगृह्यतेतदाधूमत्वसामान्यप्रत्यासत्त्यासकलधूमोपस्थितौसत्यांसर्वेषुधूमोवह्निव्याप्य १

दृतिग्रहेतुतदापर्वतीयधूमेवह्निव्याप्तेरग्रहीतत्वेनतत्रव्याप्त्युपनयासंभवेनवह्निव्याप्यधूमवानयमि
तिपरामर्शासंभवेनानुमितेरनुपपत्तेःतस्मात्सामान्यस्यप्रत्यासत्तित्वमावश्यकमिति॥तन्नादृष्टधू
मएवव्याप्तिग्रहस्यस्वीकारात्॥किंतुधूमत्वेनैवरूपेण॥तथाचपर्वतीयधूमदर्शनेसतिधूमत्वप्रकारे
णैवस्मृताव्याप्तिःपर्वतीयधूमेउपनीतासतीभासतइत्यंगीकारात्॥नहियत्रयद्गृहीतंतत्रैवतदुपनीतं
सद्भासतइतिनियमः॥किंतुयेनप्रकारेणयद्गृहीतंतत्प्रकारकत्वग्रहस्यैवतदुपनयेहेतुत्वं॥तथाचधूम
त्वप्रकारेणमहानसीयधूमेव्याप्तेर्गृहीतत्वात्पर्वतीयधूमेधूमत्वग्रहेसतिउपनीताव्याप्तिःपर्वतीयधू

सा॰प्र॰
२

मेभासते॥ तथाचपरामर्शस्यान्यथाप्युपपत्तेः किंसामान्यलक्षणयाप्रत्यासत्त्या॥ वस्तुतस्तुपरामर्शस्या
नुमितौकारणतयैवनास्ति॥ किंतुव्याप्तिज्ञानतत्स्मरणपक्षधर्मताज्ञानानामेवानुमितिहेतुत्वं॥ नचैव
धूमोवह्निव्याप्यअयंचालोकवानितिज्ञानादप्यनुमितिस्यादितिवाच्यं॥ व्याप्त्यनुभवतत्स्मरणपक्षध
र्मताज्ञानानांसमानप्रकारत्वेनानुमितौहेतुत्वांगीकारात्॥ ननुधूमत्वावच्छिन्नाव्याप्तिःसकलधूमवृ
त्तिः॥ तथाचसकलधूमाज्ञानेसंनिकृष्टधूमेकथंसागृहीत॥ ससंबंधिकपदार्थज्ञानेसंबंधितावच्छेद
कावच्छिन्नसंबंधिज्ञानस्यकारणत्वात्॥ अन्यथामल्लमेषज्ञानाभावेपितत्संयोगप्रत्यक्षापत्तिः॥ तथा २

चसकलधूमोपस्थित्यर्थंसामान्यलक्षणप्रत्यासत्तिस्वीकार्येतिचेत्॥ न॥ ससंबंधिकपदार्थज्ञानेसंबंधि
तावच्छेदकावच्छिन्नयत्किंचित्संबंधिज्ञानस्यैवकारणत्वं॥ नतुसकलसंबंधिज्ञानस्य॥ अन्यथाएकस्मिन्क
पालेघटसमवायज्ञानंनस्यात्॥ तथाचसकलधूमज्ञानंविनापिसन्निकृष्टधूमत्वावच्छिन्नव्याप्तिग्रहसं
भवात्तुकिंसामान्यलक्षणयाप्रत्यासत्या॥ नापिद्वितीयः॥ गवादिपदेष्वपिशक्त्यनुभवतत्स्मरणवाक्या
थोनुभवानांएकप्रकारेणैवहेतुमद्भावांगीकारात्॥ अपूर्वव्यक्तत्वाभक्तयोग्यतावशाद्भवति॥ अनुमि
तौपक्षधर्मताबलाद्यथा॥ तथाचशक्तिग्रहस्यसकलगोव्यक्त्युपस्थितिंविनापिसंभवात्किंसामान्यल

क्षणयाप्रत्यासत्त्या॥ नापितृतीयः॥ वह्निमानित्यनुमितिःविशेषणज्ञानसाध्यविशिष्टज्ञानत्वाद्दंडीदेव
दत्तइतिविशिष्टज्ञानवदित्यनुमानेनवह्निमानित्यनुमितेर्विशेषणज्ञानजन्यत्वसिद्धौतत्रचपर्वतीयवह्ने
रेवविशेषणत्वात्पूर्वंतज्ज्ञानमावश्यकं॥ तच्चनसंयोगादिप्रत्यासत्त्या॥ पूर्वंपर्वतीयवह्निनासंयोगस्याभा
वात्॥ तथाचवह्नित्वसामान्यलक्षणप्रत्यासत्त्यापार्वतीयवह्निज्ञानंभवतीतिस्वीकार्यमितिकिलपरस्या
भिप्रायः॥ स्यादिदंतदा॥ यदिविशिष्टज्ञानेविशेषणज्ञानस्यकारणत्वंस्यात्॥ नचतदस्ति॥ तत्रप्रमा
णाभावात्॥ ननूक्तमनुमानमेवमानमितिचेत्॥ नदृष्टांताभावात्॥ नचदंडीतिज्ञानमेवदृष्टांतः॥

तस्य विशिष्टवैशिष्ट्यज्ञानत्वेन तत्र विशेषणतावच्छेदकप्रकारकज्ञानस्यैव हेतुत्वाभ्युपगमात्॥ न च गौरयमि
ति विशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वादित्यनुमानं मानमिति वाच्यं॥ तस्य दृष्टान्ताभावेनासत्वात्
॥ न चैवं निर्विकल्पकज्ञानासिद्धिरिति वाच्यं॥ इष्टापत्तेः॥ न च सत्तानुमितौ विशेषणज्ञानजन्यत्वे तस्यैव दृष्टां
तो भविष्यतीति वाच्यं॥ तत्रापि विशेषणज्ञानस्य विशेषणतावच्छेदकप्रकारकज्ञानत्वेनैव हेतुताभ्युपगमात्
॥ चतुर्थपक्षोपि न श्लोभां विभर्त्ति॥ तथा हि॥ महानसे धूमवह्न्योः साहचर्यदर्शनानंतरं धूमो वह्निव्यभिचार
न वेति संशयो जायते॥ स च संशयो न प्रसिद्धधूमविषयकः॥ तत्र वह्निसाहचर्यस्य गृहीतत्वात्॥ तस्मात दे

सा० शांतरमतधूमविषयकइतिवाच्यं॥ तेषांचेदानीमिंद्रियेणसंयोगादेरभावात्॥ संशयेधर्मिज्ञानस्यकारण
४ त्वात्॥ तथाचतज्ज्ञानार्थंसामान्यलक्षणप्रत्यासत्तिरवश्यंस्वीकार्येतिनैयायिकानामाशयः॥ सचायुक्तः
॥ सामान्यलक्षणप्रत्यासत्तिस्वीकर्त्राप्यनुमानप्रामाण्यमवश्यंस्वीकार्यं॥ तथाचेतेनैवकालांतरीयदेशां
तरीयधूमज्ञानसंभवात्किंसामान्यलक्षणयाप्रत्यासत्त्या॥ अनुमानंचेत्थं॥ अयंधूमः धूमांतरपूर्वकः धूम
त्वात्पर्वतीयधूमवदित्यादि॥ नचतदवतारस्यव्याप्त्यादिस्मृतिविलंबेनविलंबितत्वमितिवाच्यं॥ तदनवता
रदशायामपिव्यभिचारसंशयइत्यत्रमानाभावात्॥ नचानुमानेनव्यभिचारसंशयोपपादनेत्राप्यनु

मानेऽनुमानांतरेण तत्राप्येवमित्यनवस्थास्यादिति वाच्यं॥ सर्वत्रानुमाने व्यभिचारसंशय इत्यत्र मानाभा
वात्॥ कोटिस्मरणादिविरहेणापि तदभावसंभावात्॥ तथा च सर्वत्र संशयो नास्त्येव॥ यत्र च तत्संशयस्त
त्र प्रसिद्धविशेषदर्शनादप्रसिद्धधूमज्ञानजनकं किंचित्कल्प्यं॥ तच्चावश्यं कल्पनीयत्वेनानुमानमेव क्ल
प्यते॥ न लक्षणप्रत्यासत्तिः॥ नन्वेवमनागतधूमज्ञानार्थं तदनभ्युपगमेपि अनागतगोचरप्रत्यासत्त्यर्थं
सामान्यलक्षणप्रत्यासत्तिस्वीकार आवश्यकः॥ संशयेप्यनागतधूमविशेष्यके विशेष्यप्रत्यासत्तेराव
श्यकत्वात्॥ तस्याविशिष्टज्ञानसामान्यसामग्रीत्वात्॥ तथा चानागतधूमादिना चक्षुरिंद्रियस्य संयोगा

सा० ५ देरसंभवेनसामान्यस्यैवप्रत्यासत्तित्वमावश्यकमितिचेन्॥न॥तस्यसंशयस्यमानसत्वेनाप्युपपत्तेः॥परमा
णुर्गुरुत्वाधिकरणंनवेत्यतींद्रियसंशयवत्॥चक्षुरन्वयाद्यनुविधानंतुसहचारादिसाधारणधर्मग्रहण
वोपक्षीणं॥अन्यत्रतुबाधकाभावेनसंशयस्यचाक्षुषत्वं॥अतएवव्यभिचारसंशयोपपादकत्वेनकुसुमां
जलावनुमानप्रामाण्यमुपपादितं॥शंकाचेदनुमास्त्येवनचेच्छंकाततस्तरामिति॥तस्माद्व्यभिचारसंश
यानुरोधेननसामान्यलक्षणप्रत्यासत्तिसिद्धिरिति॥अन्येतुयदिसामान्यलक्षणप्रत्यासत्त्याप्रसिद्धाप्रसि
द्धसकलधूमोपस्थितावेवाप्रसिद्धधूमेविशेषादर्शनेधूमोवह्निव्यभिचारीनवेत्याकारःसंशयःतदायदिं

धनखंडप्रभवोधूमोप्रसिद्धोवस्तुगत्यानास्त्येव॥ प्रसिद्धेचतत्प्रभवेवह्निसंबंधएवावगततः तदिंधनप्रभवधू
मगोचरएतदिंधनखंडप्रभवोधूमोवह्निव्यभिचारीनवेत्याकारकःसंशयोनस्यात्॥ प्रसिद्धेविशेषदर्शना
त्प्रसिद्धस्यचतस्यासत्वात् तदिंधनप्रभवधूमत्वंरूपसामान्यप्रसात्तत्राप्यनुपस्थितेः॥ नचासावसि
द्धएव॥ अनुकूलतर्कादिविरहदशायांधूमोवह्निव्यभिचारीनवेतिसंशयवत्तस्यापिसर्वानुभवसिद्ध
३ त्वात्॥ अथकथंचित्तत्रैवतदिंधनप्रभवधूमत्वंवह्निव्यभिचारिवृत्तिनवेत्यादिसंशयाहितस्तादृशः॥ संश
यद्वृत्तिमत्तंतर्हिप्रसिद्धधूमेपिधूमत्वंतथानवेतिसंशयाहितएवतादृशःसंशयोस्तु॥ किंतदर्थंसामान्य

मा० ६६

लक्षणयाप्रत्यासत्त्या॥ ननुसामान्यलक्षणां विना यथोक्तसंशयस्याप्यनुपपत्तिः॥ तथाहि॥ वह्निव्यभिचारित्वे
नोपस्थितासु वह्निव्यभिचारिव्यक्तिषु धूमत्वव्यतिरेकनिश्चयेन तद्वृत्तित्वसंशयाभावात् वह्निव्यभिचारित्व
रूपसामान्यलक्षणप्रत्यासत्त्यैव विशेषदर्शनग्रस्तव्यक्त्यतिरिक्तव्यक्त्युपस्थितिर्वाच्येति चेत्॥ न॥ वह्नि
व्यभिचारित्वेनोपस्थितासु अवश्यं धूमत्वव्यतिरेकनिश्चय इत्यत्र मानाभावात्॥ सामग्रीभेदात्॥ यत्तुत्त
दिंधनप्रभवधूमस्याप्रसिद्धस्य विशेष्यस्यैवाभानात् तत्र संशयो न भवत्येव॥ प्रकृते चाप्रसिद्धधूमस्य सत्त्वान
संशयेनाभाव्यमिति॥ तन्न॥ उक्तसंशयाहितस्यौचित्यावर्जितस्य संशयस्याप्रसिद्धविषयस्यापि संभवात्॥

प्रामाण्यसंशयाहितविषयसंशयवदितिवदंति॥तस्मान्नचतुर्थः॥नापिपंचमः॥एवंकिलपरस्याभिप्रायः
पाकादौचिकीर्षातावदनुभवसिद्धा॥साचनसिद्धपाकादिविषया॥सिद्धेइछाविरहात्॥तस्मादसिद्धवि
षयैवसा॥तथाचासिद्धपाकादिनाचक्षुरादेःसंयोगाद्यन्यतमप्रत्यासत्तेरभावात्॥सामान्यलक्षणाप्रत्या
सत्यैवतज्ज्ञानंभवतीतिवाच्यं॥तथाचसामान्यलक्षणाप्रत्यासत्तिरावश्यकीति॥तदपिन॥सिद्धपाका
दिविषयकज्ञानादेवासिद्धपाकादिविषयकेछाप्रवृत्त्यंगीकरात्॥नन्वेवंरजतविषयकज्ञानात्घटत्वप्र
कारकेछाप्रवृत्तीस्यातां॥सामानविषयकत्वस्यप्रयोजकत्वानंगीकारात्॥तस्माज्ज्ञानेछाप्रयत्नानां

सा॰
७

समानविषयकत्वेनैवजन्यजनकभावात्॥ असिद्धपाकादिज्ञानार्थंसामान्यलक्षणाप्रत्यसत्तिरवश्यंस्वीका
र्येतिचेत्॥न॥समानप्रकारकत्वेनैवज्ञानेच्छाप्रयत्नानांहेतुत्वं॥ तथाचसिद्धविषयकपाकत्वप्रकारक
ज्ञानादेवासिद्धपाकेपाकत्वप्रकारकचिकीर्षास्यादेव॥ नचैवंरजतत्वप्रकारकज्ञानात्घटेपिरजतत्व
प्रकारिकेच्छास्यादितिवाच्यं॥स्वप्रकाराश्रयएवज्ञानस्यस्वप्रकारकेच्छाजनकत्वस्वीकारात्॥घटस्यच
रजतत्वप्रकारानाश्रयत्वात्नतत्रतत्प्रकारकेच्छाप्रसंगइति॥नन्वेवमिदंरजतमितिभ्रमेणशुक्तौरजते
च्छाप्रवृत्तीनस्यातां॥तस्याज्ञानप्रकाररजतत्वानाश्रयत्वात्॥ तस्मात्समानविषयकत्वमावश्यक।

मितिचेत् अस्तु तावदेवं॥ तथाप्यनागतसुखादिज्ञानस्यानुमानादेवसंभवेन सामान्यलक्षणप्रत्यासत्ते
रनावश्यकत्वात्॥ न च व्याप्त्यादिप्रतिसंधानविधुराणामपि अनागतपाकादिचिकीर्षोदृश्यमानत्वा
दिदमयुक्तमितिवाच्यं॥ असिद्धेः सिद्धौ वान्यकालोत्पन्नागनागतसुखादिगोचरानुमितिजनितसं
स्कारजन्यत्वस्यैवोपपत्तेरितिदिक्॥ अत एव न षष्ठः॥ नापि सप्तमः॥ अंधकारस्याभावत्वानंगीकारात्॥
तस्य क्रियारूपाश्रयत्वेन भावत्वात्॥ न च तत्र प्रमाणाभावः॥ चलति तमो नीलं तम इति प्रत्यक्षसिद्ध
त्वात्॥ न च तमो यदि मूर्तिमत्स्यात् तर्हि बाह्यालोकनिरपेक्षचक्षुर्ग्राह्यं न स्यात्॥ तथा च तमो न गतीम

MIMAMSA
VIDYALAYA
1924
POONA

सा॰
८

नूबाह्यालोकनिरपेक्षचक्षुर्ग्राह्यत्वात्॥ व्यतिरेकेणघटवदिवादितकानुमानबाधितत्वेनप्रत्यक्षस्यभ्रां
तित्वमितिवाच्यं॥ वैपरीत्यात्॥ प्रबलंहिदुर्बलस्यबाधकंभवति॥ नचानुमानादिप्रत्यक्षोपक्षयाप्रबलं
प्रत्युतप्रत्यक्षमेवधर्म्यादिग्राहकत्वेनोपजीव्यत्वात्ज्ञात्यानुमानापेक्षयप्रबलं॥ उक्तंचनप्रत्यक्षसि
द्धमन्येनकेनापिबाध्यंदृष्टमितितत्त्वोद्योतेभगवत्पादैः॥ अन्यथावह्निशैत्यानुमानेनतदुष्णताग्राहकंप्र
त्यक्षमपिबाध्येत॥ तथाचकालात्ययापदिष्टोच्छेदःस्यात्॥ प्रपंचीतंचैतत्न्यायामृते॥ किंचकामाख्यना
नुमानापेक्षा॥ तर्काप्रतिष्ठानादितिसूत्राभ्यांसूत्रकारेणापिकेवलानुमानस्याप्रामाण्यमितिसाधितं॥ प्र

त्रयोन्यधिकरणं॥ वक्तृत्वात्तुरगः शृंगीपुष्पवत्त्वं सुतैर्युता॥ चित्रिणी चरमः षष्ठोरसत्वात्सोत्तरो भवेत् इत्या
दिना भगवत्पादैः केवलानुमानस्याप्रामाण्यं साधितं॥ विवृतं चैतत् जयतीर्थपूज्यचरणैः उक्तं च विद्यासाचा
र्यैः॥ यदा प्रत्यक्षविरोधेनापौरुषेयस्यागमस्याप्यपसरः तदा का कथा तत्साहोपजीविनोतिवराकस्यानुमा
नस्येति॥ तस्मात्प्रत्यक्षस्यानुमानाद्यपेक्षयाप्रबलत्वात् तद्विरोधेन अंधकारस्य क्रियाद्यभावसाधकानुमा
नस्यैवाप्रामाण्यं॥ न चांधकारस्य भावत्वेपि प्रौढप्रकाशकयावत्तेजःसंसर्गाभावस्य तद्व्यंजकत्वमवश्यं
वक्तव्यं॥ अन्यथान्यत्रापि तत्प्रत्यक्षापत्तिः॥ अतस्तद्ज्ञानार्थं सामान्यलक्षणप्रत्यासत्तिरवश्यमंगीका

२८४

भट्टा २

सा० यैतिवाच्यं॥ स्वरूपंसतएवतस्यव्यंजकत्वांगीकारात् तस्माल्लकयापिविधयासामान्यलक्षणप्रत्यासत्ति
६ सिद्धिनितिसिद्धं॥ इतिश्रीमत्कविकुलतिलकपद्मनाभकेशवाचार्यकृतःसामान्यलक्षणप्रत्यासत्ति
वादःसमाप्तः॥ ॥ ॥श्री॥ ६

श्रीगणेशायनमः॥ ॐ नमःसर्वभूतानिविष्टभ्यपरितिष्ठये॥ अखंडानंदबोधायपूर्णायपरमात्मने॥१
संसर्गाभवोन्योन्याभावश्चनयोर्थः॥ तत्राचान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वंव्युत्पत्तिवलल
भ्यं॥ नीलघटवतिनघटःनीलोघटोइत्याद्यव्यवहारात्॥ इहपीतघटवतिननीलघटःपीतघटोननीलो